# Shri Trailokyamohana Vajrapanjara Rama Kavacham

# શ્રીત્રૈલોક્યમોહનવજ્રપઞ્જરરામકવચમ્

## Document Information

Text title : Shri Trailokyamohana Vajrapanjara Rama Kavacham

File name : trailokyamohanavajrapanjararAmakavacham.itx

Category : raama, kavacha, panjara

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH 04-13, brahmANDapurANa

Latest update : September 12, 2020, June 10, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 10, 2022

*sanskritdocuments.org*

# શ્રીત્રૈલોક્યમોહનવજ્રપઞ્જરરામકવચમ્

અસ્ય શ્રીત્રૈલોક્યમોહનવજ્રપઞ્જરકવચસ્ય બ્રહ્મા ઋષિઃ,
ગાયત્રી છન્દઃ, શ્રીરામચન્દ્રો દેવતા, રાં બીજં, રીં શક્તિઃ,
રૂં કીલકમ્ ।  મમ સમસ્તપ્રારબ્ધપરિહારદ્વારા
શ્રીરામચન્દ્રપ્રીત્યર્થે જપે વિનિયોગઃ ।
રામિત્યાદિ ષડઙ્ગન્યાસઃ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્ ।
નીલામ્ભોધરકાન્તિકાન્તમાનિશં વીરાસનાધ્યાસિતં
    મુદ્રાં જ્ઞાનમયીં દધાનમપરં હસ્તામ્બુજં જાનુનિ ।
સીતાં પાર્શ્વગતાં સરોરુહકરાં વિદ્યુન્નિભાં રાઘવં
    પશ્યન્તં મકુટાઙ્ગદાદિવિલસદ્રત્નોજ્જ્વલાઙ્ગં ભજે ॥ ૧॥

લમિત્યાદિ પઞ્ચપૂજા ।
ૐ શ્રીપાર્વત્યુવાચ-
ભગવન્ સર્વદેશ સર્વદેવનમસ્કૃત ।
સર્વં મે કથિતં દેવ રામમન્ત્રં વિશેષતઃ ॥ ૨॥

ત્રૈલેક્યમોહનં નામ કવચં પૂર્વસૂચિતમ્ ।
કથયસ્વ મહાભાગ યદ્યહં તવ વલ્લભા ॥ ૩॥

શ્રી ઈશ્વર ઉવાચ-
શ ૃણુ વક્ષ્યામિ દેવેશિ કવચં પરમાદ્ભુતમ્ ।
અત્યન્તગોપિતં ગુહ્યં બ્રહ્મમન્ત્રૌઘવિગ્રહમ્ ॥ ૪॥

કવચસ્ય ઋષિર્બ્રહ્મા ગાયત્રી છન્દ ઈરિતમ્ ।
દેવતા રામચન્દ્રોઽસ્ય વિનિયોગોઽષ્ટસિદ્ધિષુ ॥ ૫॥

ઓમ્ । પ્રણવો મે શિરઃ પાતુ તારકબ્રહ્મરૂપધૃત્ ।
અનન્તોઽગ્નિસહસ્રેન્દુઃ નાસાં પાતુ રઘોઃ પતિઃ ॥ ૬॥

રાં રામાય નમસ્તુભ્યં ષડ્વર્ણો ભુક્તિમુક્તિદઃ ।
ફાલં પાયાન્નેત્રયુગ્મં રામો દ્વ્યક્ષરસંજ્ઞકઃ ॥ ૭॥

રાં રામચન્દ્રાય નમો ભ્રૂદ્વયં પાતુ મેઽન્વહમ્ ।
રાં રામભદ્રાય નમશ્ચુબુકં પાતુ મે સદા ॥ ૮॥

ક્લીં મે પાયાચ્છ્રોત્રયુગ્મં કર્ણૌ મે વિશ્વમોહનઃ ।
ક્લીં રામાય નમશ્ચેતિ મુખં મે પરિરક્ષતુ ॥ ૯॥

તારં રામચતુર્થં તુ ક્રોધાસ્ત્રવહ્નિકલ્પિતમ્ (?) ।
અષ્ટર્ણોઽયં પરો મન્ત્રો જિહ્વાં મે પાતુ સર્વદા ॥ ૧૦॥

ગુણં બીજં તથા માયાં હૃદ્રામાય તતશ્ચર ।
શિરો માં રામમન્ત્રોઽયં ગણ્ડયુગ્મં સદાવતુ ॥ ૧૧॥

ૐ હૃદ્ભગવતે રામચન્દ્રભદ્રૌ ચ ઙેયતા ।
અર્કાનુદ્વિવિધૌ મન્ત્રૌ રક્ષતાં મમ કન્ધરમ્ ॥ ૧૨॥

રાં રામચન્દ્રાય સ્વાહા ષડ્વર્ણોઽવ્યાદ્ભુજદ્વયમ્ ।
શ્રીરામાય નમશ્ચાસૌ કક્ષૌ પાતુ ખરાન્તકઃ ॥ ૧૩॥

? ? નૃસિંહો લક્ષ્મીપાશાઙ્કુશસ્તતઃ ।
વર્માસ્ત્રાણિ વધૂ યુક્તો રવ્યર્ણોઽવ્યાદુરઃસ્થલમ્ ॥ ૧૪॥

શ્રીરામચન્દ્રાય તતો રક્ષોઘ્નાય નમસ્ત્વયમ્ ।
હૃદયં મે સદા પાતુ રઘુવંશસમુદ્ભવઃ ॥ ૧૫॥

રામાઙેતુ વરાહાસ્ત્રં વહ્નિજાયાયુતં મનુઃ ।
વીરસ્વરૂપરામાભ્યાં સપ્તાર્ણા પાતુ પાર્શ્વકૌ (? ) ॥ ૧૬॥

ૐ શ્રીં હ્રીં ક્લીં તતો રામં ચ રામાય નમસ્ત્વયમ્ ।
દશાક્ષરાઙ્ગો મન્ત્રો મે પુરતઃ પૃષ્ઠતોઽવતુ ॥ ૧૭॥

શ્રીપૂર્વં જય મધ્યસ્થં તદ્વિધા રામ રામ ચ ।
નમઃ પઞ્ચદશાર્ણોઽયં સદા પાતુ મમોદરમ્ ॥ ૧૮॥

હું જાનકીવલ્લભાય સ્વાહાદ્યાવતુ મધ્યમમ્ ।
શ્રીરામચન્દ્રાય સ્વાહા નાભિમષ્ટાક્ષરોઽવતુ ॥ ૧૯॥

ક્લીં રામચન્દ્રાય તતઃ સીતાયાઃ પતયે નમઃ ।

મન્વસ્યઃ સક્થિની પાતુ રાક્ષસેન્દ્રવિમર્દનઃ ॥ ૨૦॥

ૐ રામભદ્રાય નમો ગુહ્યં મે પાતુ રાઘવઃ ।
શ્રીરામભદ્રાય નમો મમ પાતૂરુયુગ્મકમ્ ॥ ૨૧॥

પ્રણવો રામચન્દ્રાય સ્વાપાત્યષ્ટાક્ષરોઽવતુ ।
પાદયુગ્મં સદા પાતુ વાનરેન્દ્રાશ્રયઃ પ્રભુઃ ॥ ૨૨॥

રામભદ્ર મહેષ્વાસ રઘુવીર નૃપોત્તમ ।
દશાસ્યાન્તક માં રક્ષ દેહિ નઃ પરમે(માં) શ્રિયમ્ ॥ ૨૩॥

દ્વાત્રિંશદક્ષરો યસ્સ્યાત્ સર્વાઙ્ગં પાતુ મે સદા ।
શ્રીં સીતાપતયે નમઃ પ્રાચ્યાં માં સર્વદાવતુ ॥ ૨૪॥

હુઁ જાનકીવલ્લભાય સ્વાહા યામ્યાં ચ સર્વદા ।
ક્લીં જાનકીવલ્લભાય પ્રતીચ્યાં સર્વદાવતુ ॥ ૨૫॥

શ્રીરઘુનન્દનાય નમઃ કૌબેર્યાં દિશિ રક્ષતુ ।
શ્રીં સીતાયૈ તતઃ સ્વાહા રાં રામાય નમસ્ત્વયમ્ ॥ ૨૬॥

સીતારામાખ્યમન્ત્રે(ન્ત્રોઽયં) વિદિક્ષૂર્ધ્વમધશ્ચ મામ્ ।
નમો ભગવતે બ્રૂયાચ્ચચતુર્થ્યાં રઘુનન્દનઃ ॥ ૨૭॥

રક્ષો ઘોરદિ ? ? મધુરાદિ સમીરયેત્ ।
પ્રસન્નવદનાયેતિ પશ્ચાદમિતિતેજસે ॥ ૨૮॥

બલાય પશ્ચાદ્રામાય વિષ્ણવે તદનન્તરમ્ ।
પ્રણવાદિનમોઽન્તોઽયં માલામન્ત્ર ઉદીરિતઃ ॥ ૨૯॥

સર્વસ્થાનેષુ કાલેષુ પાતુ માં રઘુનન્દનઃ ।
વદેદ્દાશરથાયેતિ વિદ્મહેતિ પદં તતઃ ॥ ૩૦॥

સીતાપદં સમુદ્રત્યા(સમુચ્ચાર્ય)વલ્લભાયપદં તતઃ ।
ધીમહીત્યથ તં નોઽથ રામશ્ચાપિ પ્રચોદયાત્ ॥ ૩૧॥

એષા સ્યાદ્રામગાયત્રી સર્વાવસ્થાસુ પાતુ મામ્ ।
ઇતિ તે કથિતં દેવિ સર્વમન્ત્રૌઘવિગ્રહમ્ ॥ ૩૨॥

ત્રૈલોક્યમોહનં નામ કવચં બ્રહ્મરૂપકમ્ ।
પ્રાતઃ કાલે પઠેદ્યસ્તુ કવચં મુક્તિસાધકમ્ ॥ ૩૩॥

કીર્તિશ્રીકાન્તિમેધાયુર્ભૂતિશ્ચ ભવતિ ધ્રુવમ્ ।
રામમન્ત્રમથ બ્રહ્મકવચં મનુચોદિતમ્ ॥ ૩૪॥

ગુહ્યમભ્યર્ચ્ય વિધિવત્ પુનશ્ચર્યાં સમાચરેત્ ।
અષ્ટોત્તરશતં જપ્ત્વા દશાંશં હવનાદિકમ્ ॥ ૩૫॥

તતઃ સુસિદ્ધં કવચં સર્વકાર્યાણિ સાધયેત્ ।
મન્ત્રસિદ્ધિર્ભવેત્તસ્ય પુરશ્ચર્યાં વિના તતઃ ॥ ૩૬॥

લાજ આજ્યં ચ ।
ગદ્યપદ્યમયી વાણી તસ્ય વક્ત્રાત્પ્રવર્તતે ।
વક્ત્રે તસ્ય વસેદ્વાણી કલાશ્ચ નિશ્ચલા ગૃહે ॥ ૩૭॥

પુષ્પાઞ્જલ્યષ્ટકં દત્ત્વા મલેનૈવ પરે સકૃત્ ।
અપિ વર્ષસહસ્રાણિ પૂજાયાઃ ફલમાપ્નુયાત્ ॥ ૩૮॥

વિલિખ્ય ભૂર્જપત્રે તુ સ્વર્ણસ્થં ધારયેદ્યદિ ।
કર્ણે ચ દક્ષિણે બાહૌ સ કુર્યા વતં(દવિતં)જગત્ ॥ ૩૯॥

ત્રૈલોક્યં ક્ષોભયત્યેવ ત્રૈલોક્યવિજયી ભવેત્ ।
તદ્ગાત્રં પ્રાપ્ય શાસ્ત્રાણિ બ્રહ્માસ્ત્રાદીનિ યાનિ ચ ॥ ૪૦॥

માલ્યાનિ કુસુમાનીવ સુખદાનિ ભવન્તિ હિ ।
સાર્ધમુ .. .. ॥। હવને લક્ષ્મીવાણીમુખે વસેત્ ॥ ૪૧॥

ય ઇદં કવચં જ્ઞાત્વા યો જપેદ્રામમન્ત્રકમ્ ।
શતલક્ષમવાપ્નોતિ સોઽચિરાન્મૃત્યુ(ન્મુક્તિ)માપ્નુયાત્ ॥ ૪૨॥

ત્રૈલોક્યમોહનં જપ્ત્વા ન મન્ત્રાસિદ્ધિસાધકઃ ।
સ શસ્ત્રઘાતમાપ્નોતિ સોઽચિરાન્મૃત્યુમાપ્નુયાત્ ।
તસ્માત્ સર્વપ્રયત્નેન કવચં ધારયેદ્બુધઃ ॥ ૪૩॥

ઇતિ બ્રહ્માણ્ડપુરાણે પાર્વતીશ્વરસંવાદે ત્રૈલોક્યમોહનવજ્રપઞ્જરરામકવચ
નામ દિવ્યમન્ત્રકવચં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Trailokyamohana Vajrapanjara Rama Kavacham*

pdf was typeset on June 10, 2022

Please send corrections to *sanskrit@cheerful.com*